CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13.

Coll. No. 696.

Title Bhaktihetunirnaya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 896. Subject: Vedānta.

Title: Bhaktihetunirṇaya.

Author: Viṭṭhaleśvara. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 8.9" by 4.9" Extent: 7 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

भक्तिहेतुपत्र १

भक्तिहेतु॰ श्रीगोपीजनवल्लभायनमः ब्रह्मादिदुर्लभकथंराधामानापनोदकं कृष्णं तदनु
१ ग्रहैकलभ्यांभक्तिंचनुमस्तदीयांश्च १ नन्विदमनेकप्रमाणविसंवादीवभातियदनु
ग्रहेतरसाधनासाध्यत्वंभक्तौ तथाहि एकादशस्कंधे श्रद्धामृतकथायांमइत्युप
क्रम्य इष्टंदत्तंहुतंजप्तंमदर्थंयद्व्रतंतपः एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां मयि
संजायतेभक्तिः कोन्योर्थोस्यावशिष्यत इत्यत्रभगवद्धर्माणांयागदानादेश्चभक्तिहेतु
त्वंश्रूयते तत्रैवपूजाप्रकारमुक्त्वाभक्तियोगंसलभत एवंयः पूजयेतमामितिचभग
वतोक्तं दशमस्कंधेच दानव्रततपोहोमजपस्वाध्यायसंयमैः श्रेयोभिर्विविधैश्चान्यैः
कृष्णेभक्तिर्हिसाध्यत इत्युद्धववाक्येदानादेस्तथात्वमुच्यते जन्मांतरसहस्रेषुतपोध्या
नसमाधिभिः नराणांक्षीणपापानांकृष्णेभक्तिःप्रजायत इत्यत्रपापाभावस्यापितथा
त्वमुच्यते एकादशएव यथानुष्ठीयमानेनत्वयिभक्तिर्नृणांभवेत् स्वधर्मेणार
विंदाक्ष तन्ममाख्यातुमर्हसि इतिप्रश्नेवर्णाश्रमधर्मान्निरूप्य इतिमांयः स्वधर्मेण

भजन्नित्यमनन्यभाक् सर्वभूतेषुमद्भावोमद्भक्तिंलभतेचिरादित्युपसंहारात्पूर्वोक्त
धर्माणांभक्तिहेतुत्वंनिश्चीयते नचभक्त्युत्पत्तौस्वरूपयोग्यतासंपादकत्वेनतद्धर्मेषु
तद्धेतुत्वमुपचर्यत इतिवाच्यं जीवत्वेनैवतत्रस्वरूपयोगत्वात्सर्वेषां देवोऽसुरो
मनुष्योवेतिवाक्यात् आगंतुकधर्माणांक्वचिदपितत्संपादकत्वादर्शनाच्च धर्मा
वतामपिभक्त्यभावेनव्यभिचारादकारणत्वंचेद्ब्रवीतिभवान्नूनंतदाधर्मसहकारित्वमनु
ग्रहस्यांगीकरोतु नहिसहकारिविरहेणकार्याभावोऽकारणतासंपादकः दंडादे
रपिघटादौतथात्वप्रसंगात् भक्त्यैवतुष्टिमभ्येतिविष्णुर्नान्येनकेनचित् भक्त्यातुतो
षभगवानाजयूथपाय प्रीयतेमलयाभक्त्याहरिरन्यद्विडंबनमित्यादिवाक्यैर्वैपरीत्य
श्रवणाच्च भक्तौधर्मसंपत्तिहेतुर्भक्तिरनुग्रहे इतियुक्तमुत्पश्यामः नचधर्मरहि
तानामपिभक्तिदर्शनान्नैवमितिवाच्यं कार्येणजन्मांतरीयतदनुमानसंभवात्
नचान्योन्याश्रयः वाचनिकं ह्येतत्पूर्वोक्तवाक्यैरसंदिग्धंधर्मकारणतानिश्चयात्

भक्तिहेतु: नचानुग्रहहेतुत्वेन तद्धेतुत्वं तेषु मतइतिवाच्यं एवंबोधकप्रमाणाभावात् साक्षा
२ त्कारणत्वबोधकस्योक्तत्वात् किंच अनुग्रहोनामधर्मांतरंफलदिदृक्षया नाच:
मानाभावात् गौरवाच्च नेतर: तस्यानित्यत्वेन तत्सहकार्यनंगीकाराच्च स्व...न
वेवभक्तिसंभवेनाधुनैवभक्तिमत्वानुपपत्ते: तस्यामुक्तिचरकारणत्वेन तेषांद्वितो
यजन्मासंभवेनाधुनिकभक्तदर्शनानुपपत्तेश्च आद्यपक्षेपीदंदूषणं ज्ञेयं भगव
द्धर्माणांनित्यत्वांगीकारात् तस्यजन्यत्वोक्तौनुपरमतप्रवेश: धर्माणामेवतज्जन
कत्वसंभवात् इच्छायास्तथात्वेपूर्वोक्तदूषणापत्ति: नित्यत्वात्तस्या: तस्याश्च
ज्ञानजन्यत्वनियमेननित्यासर्वविषयकज्ञानवद्भगवदिच्छायाअजन्यत्वमनु...
किंच अनुग्रहस्या...तत्वेनि:शंकातदर्थिप्रवृत्तिर्नस्यात् स्वविषयकानुग्रहजन
कत्वस्यज्ञातुमशक्यत्वात् ज्ञानेचप्रवृत्त्युच्छेद: तथाच यस्यांवैश्रूयमाणायांकृष्णे
परमपूरुषे भक्तिरुत्पद्यतेपुंस:शोकमोहभयापहेत्यादिनातदर्थेव्यासस्यश्रीभा २

गवतेप्रवृत्तिरित्युक्तिश्चविरुद्धास्यात् किंच त्वदुक्तरीत्याशास्त्रार्थज्ञानेश्रौतविधिनि
षेधांगीकारानुपयोगत्वात्तदर्थिषुसदाचारोच्छेदप्रसंग: नचेष्टापत्ति: भक्त्यु
तीन त्पत्तयेतत्तरक्षाहितैरत्वादेवंभावस्य अतएवभरतस्यातथात्वंपूर्वंतथात्वंचाये तस्मा
दकामोपहतास्विलवर्णाश्रमधर्मैरनेकजन्मसंचितै:सत्वशुद्धावंजनाभ्यासजनित...
नतिमिरापहतोवस्तुतत्वज्ञानमिवभगवद्भक्तिरेवपुरुषार्थइतिशास्त्रार्थज्ञानं ततस्त
दर्थमेववर्णाश्रमधर्मकरणेभगवद्भक्तिस्तयाचानुग्रहस्तेनचमुक्तिरितिराजवर्त्म
विदुषांविदुषांनज्ञानधनमोक्ष:कथंचनेतिप्रियंतेवदाम: त्वदुक्त...सत्वप्यावप्ये
केषांज्ञानमार्गिताकेषांचिद्भक्तिनिष्ठैवेत्यत्रकोहेतुरुच्यतां नचमुक्तेतारतम्यंवा
च्यंतत्तुल्यतायत: ज्ञानस्याप्यन्यथोत्पत्तिर्नस्यादितिविचारय तस्मादाद्या...ते
यीभक्तावनुपपत्तित: केवलानुग्रहात्सेतिमंतव्यंप्रतिवादिना नन्वेवमपिमदुक्त
मेवानुवदतिभवान् यतोनुग्रहरूपसहकारिविशेषंप्राप्यसत्वशुद्धिरेवभक्तिज

भक्तिहेतु
४
नांतथैवप्रवृत्तिस्तथैवचफलं एतेनभक्तमार्गेषुसदाचारोच्छेदप्रसंगइतिदूषणंनि
रस्तंवेदितव्यं येषुजीवेषुयथाभगवदिच्छातथैवतेषांप्रवृत्तेरावश्यकत्वात् आ
तएवभक्तमार्गिणांनिःशंकप्रवृत्त्यभावप्रवृत्त्युच्छेदावपिनिरस्तौ अपरंच तस्मा
न्मद्भक्तियुक्तस्ययोगिनोवैमदात्मनः नज्ञानंनचवैराग्यंप्रायःश्रेयोभवेदिह
यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चयत् योगेनदानधर्मेणश्रेयोभिरितरैरपि
सर्वंमद्भक्तियोगेनमद्भक्तोलभतेंजसा स्वर्गापवर्गंमद्धामकथंचिद्यदिवांछति
नकिंचित्साधवोधीराभक्ताह्येकांतिनोमम वांछंत्यपिमयादत्तंकैवल्यमपुनर्भवम्
इत्यादिवाक्यैर्ज्ञानवैराग्यरहितानामेवभक्तिकथनाद्भक्तेःकल्पतरुस्वभावत्वेनेतर
सकलसाधनसाध्यसाधकत्वेपिस्वनेतरसाधनसापेक्षताभक्तौ भगवान्भज
तांमुकुंदोमुक्तिंददातिकर्हिचित्स्मनभक्तियोगमितिश्रीशुकवचनेमुक्तिसाधन
पूर्णानामपिभगवद्दानेभक्तिप्राप्तिरदानेचाप्राप्तिरितिनिरूपणाद्दप्यनुग्रहेतर ४

साधनासाध्यत्वंभक्तौनिश्चीयते उक्तमार्गद्वयेचांगीकारोनुग्रहेणैवेतिनमर्या
दामार्गेपिभक्तेःसाधनत्वंसाध्यत्वं अन्यथाजायस्वम्रियस्वेतितृतीयमार्गएवां
गीकारकथंनकुर्यात् पुष्टेसाधनानांव्यभिचारादेवनहेतुत्वंकिंतुभपिशाकमि
त्यसमुक्तिभिः एवंसतिसाधनमार्गकरणंयतस्तद्दृश्यते पोषणंतदनुग्रहइति
वाक्यात्पोषणलीलायाःस्वतंत्रत्वाद्यस्यानुग्रहमिच्छामीतिवाक्याच्चानुग्रहोधर्मी
तस्मैव अनुग्रहानुरूपाचेच्छासर्वत्रसहकारिणी सहकारिनिरपेक्षानुग्रह
साध्याभक्तिरित्यपिगुडजिह्विका वस्तुतस्तुकार्यमात्रमिच्छामात्राधीनमेवेति
त्वयाप्युररीकर्तव्यं तथाहि यदायदायद्यत्कार्यंभवतिभाव्यंवा तत्तत्काली
पाधौक्रमिकेनतेनतेनहेतुनातत्तत्कार्यंकरिष्यइतिततः पूर्वंभगवदिच्छास्त्यासी
दितिवामंतव्यं अन्यथातच्चिकीर्षायाअत्रस्यनित्यत्वेनयुगपत्सकलकार्योत्पत्ति
प्रसंगः नचेतरकारणसमवधानान्नतथेतिवाच्यं तस्यापिकार्यत्वेनतच्चिकी

क्तिहेतुः प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं तान्नोपसीदत हरेर्गदयाभिगुप्तान्नै
७ षां वयं न च वयः प्रभवाम दंडे इत्यादिवाक्येषु भक्तानां कालानधीनत्वश्रवणादपि न क
र्मसाध्यत्वं भक्तौ कर्मणां तत्तत्काल एव विधानेन तदधीनत्वात् कालसाध्यसाधन
साध्यफलस्यापि तत्परिच्छेद्यत्वनियमात्स्वर्गादेरिव ब्रह्मभावस्यापि कालासाध्य
त्वान्न तत्साध्यमुक्तावपि तथात्वं अपरं च यदायमनुगृह्णाति भगवानात्मभावितः
स जहाति मतिं लोके वेदे च परिनिष्ठितामिति वाक्यात्तादृशानुग्रह एव भक्तिमार्गे
त लोकवेदातीतविज्ञानं विश्वासश्चेति तदुदितेषु तदधिकनिरूपणं व्यर्थमिति तद्वस्त
स्तुज्ञानलेशमात्रमेतेन प्रकाशितमित्यलं विस्तरेण॥ ॥गोपीशपदसर्वस्वः
पितृपादाब्जसेवकः निर्णीतवान्भक्तिहेतुं निगूढाशयविठ्ठलः १ इति श्रीवि
ठ्ठलेश्वरविरचितो भक्तिहेतुनिर्णयः समाप्तः॥ ॥